प्रक्रियासर्वस्वीयतद्धितप्रकरणे पाणिनिभोजयोः स्वाधीनम् ॥

Anupama K.
Research Scholar, Dept. of Sanskrit, Calicut University.

Submitted on: 13/07/2019 Revised on:17/07/2019 Accepted on: 27/07/2019

अष्टाध्याय्याः प्रक्रियापद्धत्याम् आगतेषु पाण्डित्यपूर्णव्याख्यानेषु अद्वितीयं भवति मेल्पत्तूर्नारायणभट्टस्य प्रक्रियासर्वस्वं नाम व्याकरणग्रन्थः। प्रकृतिषु प्रत्ययवत् गोपिकासु प्रत्येकं सम्मिलितं मुरारेः मनोरमं रूपं स्मृत्वा ग्रन्थकारः अस्य ग्रन्थस्य प्रारम्भः कृतः। तेन मङ्गलश्लोकेनैव तस्य काव्यगुणं, प्रतिपादनशैलिः, पाण्डित्यं च अस्माभिः ज्ञातुं शक्यते। तत्र तद्धितप्रकरणे पाणिनीयस्य तथा भोजव्याकरणस्य प्रभावः कैश्चन उदाहरणैः अत्र प्रतिपाद्यते। समान्यतया संस्कृते सर्वैः पदस्य प्रकारद्वयमङ्गीक्रियते, यथा नामपदं क्रियापदञ्च। कमपि प्रत्येकार्थसिध्यर्थं नामपदेन सह प्रयुज्यमानाः प्रत्ययाः तद्धितप्रत्ययाः इत्युच्यन्ते। नामशब्देभ्यः प्रत्ययययोजनेन तद्धितान्तशब्दाः उत्पद्यन्ते। तद्धितशब्दस्यार्थः एवं भवति यत् तेभ्यः प्रयोगेभ्यः हिताः हिताः इति तद्धिताः । तद्धितप्रत्ययानां योगेन निष्पन्नाः शब्दाः तद्धितान्ताः इति व्यवहियन्ते। विभिन्नाः तद्धितप्रत्ययाः विभिन्नार्थेषु प्रयुज्यन्ते। तद्धिताः इति अधिकारसूत्रेण तद्धितप्रकरणस्यारम्भः पाणिनिना कृतः। तद्धिताः इति चतुर्थाध्यायस्थसूत्रादारभ्य निष्प्राणिवश्च इति पञ्चमाध्यायस्य अन्तिमसूत्रपर्यन्तं अध्यायद्वये विस्तृतया पाणिनिना तद्धितप्रकरणं प्रतिपादितम्।

भोजदेवः प्राग्जितीयाणादयः तद्धिताः इति सूत्रेण तद्धितसंज्ञा उक्ता। तदनुसृत्य प्राग्जितादण् इति सूत्रादारभ्य पञ्चमाध्यायस्य निष्प्रवाणिः इति अन्तिमसूत्रपर्यन्तं तद्धितप्रत्ययानाम् अधिकारो भवति। भोजदेवः पाणिनिवत् अध्यायद्वये सविस्तरेण भोजदेवः तद्धितप्रकरणं प्रतिपादयति। सरस्वतीकण्ठाभरणस्य तद्धितप्रकरणं विविधविशेषताभिः सम्पूर्णं भवति। पाणिनिना तद्धितप्रकरणस्य बृहद्भागः समर्थानां प्रथमाद्वा इति सूत्रेण नियमितः। किन्तु सरस्वतीकण्ठाभरणे एवं नियामकसूत्रोल्लेखः भोजेन न कृतः। एवं पाणिनिवत् भोजदेवः गणपाठः न स्वीकृतः। तस्मात् पाणिनिना गणं कृत्वा गणस्य आद्यशब्दमुच्चार्य यानि कार्याणि उक्तानि, तानि भोजदेवेन गणस्थानां सर्वेषां शब्दानामुच्चारणेन प्रतिपादितानि। पाणिनिना प्रतिपादितानां कार्याणां स्पष्टतायै एवं कृतं चेदपि तेन भोजसूत्राणि दीर्घरूपाणि तथा उच्चारणार्थं कण्ठस्थीकरणार्थं च क्लिष्टकराणि अभवन्। पाणिनिना एकेन सूत्रेणोक्तं कार्यं साधयितुं भोजदेवेन कुत्रचित् सप्ताधिकानि सूत्राणि उपयुक्तानि। यथा- अश्वपत्यादिभ्यश्च इति पाणिनीयसूत्रं भोजदेवेन अश्वपत्यादिगणस्थान् सम्पूर्णान् शब्दान् उच्चार्य अश्वशतधन्-गणराष्ट्रकूलगृहपशुधान्यधर्मधन्वन्सभाप्राणसेनाकषेत्रादिपूर्वादण् इति कृतवान्।

नारायणभट्टेन पाणिनीयसूत्राणां गणस्वीकारेण सूत्राणि प्रयुक्तानि चेदपि क्रमः प्रक्रियादिशया परिवर्तितः। पाणिनिः गणस्वीकारेण यावतः शब्दान् निष्पादितवान् तावतः अधिकान् शब्दान् भोजः गणापेक्षया साधितवान्। इत्यनेन नारायणभट्टः भोजं भूरि भूरि प्रशंसति प्रक्रियासर्वस्वे तस्य मतानि स्वीकरोति च। प्रक्रियासर्वस्वे केवलं तद्धितखण्डे एव एकस्त्रिंशत्सूत्रेषु नारायणभट्टः भोजनाम उल्लिखितम्। नामस्मरणं विनापि तत्र भोजमतानि भट्टपादेन स्वीकृतानि। सरस्वतीकण्ठाभरणस्य व्याख्याकारं हृदयहारिणीकारं दण्डनाथं तद्धितखण्डे सूत्रद्वये नारायणभट्टः स्मरति।

तद्धितखण्डे अपत्याधिकारे पाणिनिना अनृष्यानन्तर्ये बिदादिभ्योऽञ् इति सूत्रमुच्यते। बिदादौ ऋषयः अनृषयः इति पठिताः। बिद, उर्व, कश्यप, कुशिक, भरद्वाज, उपमन्यु, किलात, कन्दर्प (किंदर्भ), विश्वानर, ऋषिषेण (ऋष्टिषेण), ऋतभाग, हर्यश्व, प्रियक, आपस्तम्ब, कुचवार, शरद्वत्, शुनक (शुनक्), धेनु, गोपवन, शिग्रु, बिन्दु (भोगक), भाजन (शमिक), अश्वावतान, श्यामाक, श्यामक (श्यावलि), श्यापर्ण हरित, किंदास, बह्यस्क, अर्कजूष (अर्कलूष), बध्योग, विष्णुवृद्ध, प्रतिबोध, रचित (रथीतर), रथन्तर, गविष्ठिर, निषाद (शबर अलस), मठर (मृडाकु) सृपाकु, मृदु, पुनर्भू, पुत्र दुहितृ ननान्दृ परस्त्री परशुंच इति बिदादिः। तत्र ये अनृषयः तेभ्यः अनन्तरापत्ये गोत्रे विवक्षिते अञ् स्यादिति अस्य सूत्रार्थः। यथा पुत्रस्यानन्तरापत्यम् इत्यर्थे पौत्रः। अनेन अञ् प्रत्ययमुक्त्वा गर्गादिभ्यो यञ् इत्यनेन गर्गादिभ्यः गोत्रापत्ये यञ् प्रत्ययः विहितः। ततः द्वितीयाध्याये यञञोश्च इति सूत्रेण गोत्रे यद्यञन्तमञन्तं च तदवयवयोरेतयोर्लुक्स्यात्तत्कृते बहुत्वे, न तु स्त्रियाम् इत्युच्यते। एवं तर्हि अनेन गोत्रार्थे यञ् अञ् प्रत्ययार्थगतबहुत्वे प्रत्ययथोः लोपः उच्यते। गर्गाः इत्युदाहरणम्। पुनः तत्रैव न गोपवनादिभ्यः इति सूत्रेण गोपवनादिभ्यः गोत्रप्रत्ययस्य लुक्निषेधः उच्यते। गोपवनादिशब्दाः बिदादिगणे पठिताः। गौपवनाः इत्यादीन्युदाहरणानि तत्र दत्तानि। तत्र सूत्रे गोपवन इति शब्दादारभ्य सर्वेषां शब्दानां लुक्निषेधः अस्ति वा न वा इति स्पष्टतया सूत्रे न प्रतिपादितम्।

किन्तु भोजदेवः पाणिनेः अनृष्यानन्तर्ये बिदादिभ्योऽञ् इति सूत्रस्थाने गणपाठस्य आश्रयं विना पुनर्भूपुत्रदुहितृननान्दृनिषादेभ्योऽनन्तरेऽञ्, परस्त्रियाः परशुश्च, बिदोर्वकश्यपकुशिकभरद्वाजोपमन्यु-किलातविदर्भविश्वानरर्ष्टिषेणेभ्यः पौत्रादौ, ऋतभागहर्यश्वप्रियकापस्तम्बकुचवारशरद्वच्छुनकधेनुर्भ्यः, गोपवनशिग्रुबिन्दुभाजनाश्वावतानश्यामाकशम्बकश्यापर्णेभ्यः, हरितकिन्दासबह्यस्कार्कलूषवध्योगविष्णु-वृद्धप्रतिबोधरथीतररथन्तरगविष्ठिरगविष्ठिलनिषादशम्बरमठरसृदारुपृदाकुभ्यश्च इति पञ्चसूत्राणि प्रयुक्तानि। एवं गर्गादिभ्यो यञ् इति सूत्रस्थाने सरस्वतीकण्ठाभरणे सप्तसूत्राणि च प्रयुक्तानि। एवं यञञोश्च इति सूत्रस्था भोजः पौत्रादिभ्यः बहुत्वे लुगभावार्थं यञञोरपुनर्भूपशुपुत्रदुहितृननादृभ्यः इति सूत्रमुच्यते। तत्र हृदयहारिण्यां यञञोः प्रत्ययथोरस्त्रीयामपत्ये समुत्पन्नयोर्बहुषु लुग् भवति, पुनर्भूप्रभृतिभ्यो विहितस्य लुङ् न भवति इत्यर्थः उच्यते। ततः पाणिनीयसूत्रस्य न गोपवनादिभ्यः इति सूत्रस्थाने न गोपवनादिभ्योऽष्टभ्यः इति सूत्रमुच्यते। तत्र गोपवनादिभ्यः शब्देभ्योऽष्टभ्यः परस्यापत्यप्रत्ययस्य लुङ् न भवति इति स्पष्टतया उच्यते।

प्रक्रियासर्वस्वे नारायणभट्टेन न गोपवनादिभ्यः इति पाणिनीयसूत्रमुक्त्वा भोजवत् बिदादिगतेभ्यो गोपवनादिभ्योऽष्टभ्यः परस्य बिदाद्यञो यञञोश्च इति प्राप्तो लुग्न स्यात् इति सूत्रार्थः उच्यते। गौपवनाः बैन्दवाः इत्यादीनि उदाहरणानि प्रदर्श्य नारायणभट्टेन पौनर्भवपाराशवदौहित्रपौत्रननान्द्राणां बिदाद्यन्तानामपि बहुषु लुङ् नेति भोजः इति च उच्यते। अत्र नारायणभट्टेन सरस्वताकण्ठाभरणस्थभोजसूत्रमनुसृत्य पाणिनीयसूत्रस्य व्याख्यानं दत्तम्।

एवं लुक् तद्धितलुकि इति सूत्रेण तद्धितलुकि सत्युपसर्जनस्त्रीप्रत्ययस्य लुक् स्यात् इत्युच्यते। श्रविष्ठासु जातः श्रविष्ठः इत्यादीन्युदाहरणानि च तत्र दत्तानि। किन्तु भोजव्याकरणे लुक् तद्धितलुक्यगोणीसूच्योः इति सूत्रमुच्यते। तत्र अगोणीसम्बन्धीनां टाबादीनां तद्धितलुकि सति लुग् भवतीत्युच्यते। ततः श्राविष्ठाषाढाभ्यां छण् च , फल्गुन्यष्ट च , इति द्वयोः सूत्रयोः श्राविष्ठः, आषाढः, फाल्गुनः इत्यादीनि रूपाणि निष्पादितानि। तत्र तेन श्रविष्ठाषाढाभ्यां तत्र जात इत्येतस्मिन्नर्थे संज्ञायां नक्षत्राणो लुक् छण् डिदण् च वेति प्रत्ययाः भवन्ति इत्युक्त्वा अणः लुकि श्रविष्ठः, छण् प्रत्यये कृते श्राविष्ठः, डिदण् प्रत्यये कृते श्राविष्ठीयः इति रूपाणि उच्यन्ते। प्रक्रियासर्वस्वे नारायणभट्टेन लुक् तद्धितलुकि इति सूत्रस्य व्याख्यानसन्दर्भे श्राविष्ठः, आषाढ, फाल्गुन इत्यणपि भोजोक्ताः इत्युच्यते। अणः लोपः भोजेनोच्यते चेत् भट्टपादेन श्राविष्ठः इत्यणपि भोजोक्ताः इति कथं प्रतिपादितम् इति स्पष्टता न प्राप्ता।

तथा अन्तः पूर्वपदाट्ठञ् इति पाणिनीयसूत्रस्य व्याख्याने नारायणभट्टः अग्निष्टोमादिभ्यो मन्त्र इति भोजः इत्युक्तम्। काशिकादिषु भावार्थे अग्निष्टोमादिभ्यः प्रत्ययस्य लुक् विधायकं सूत्रम् अथवा वार्तिकं न प्राप्तम्। भोजः सरस्वतीकण्ठाभरणे मन्त्रेऽग्निष्टोमादिभ्यः इत्युक्त्वा अग्निष्टोमादिभ्यः भवार्थे मन्त्रे अभिधेये ठञ्प्रत्ययस्य लुक्विधीयते। तस्मात् अग्निष्टोमे भवो मन्त्रः अग्निष्टोमः इत्यादयः प्रयोगाः निष्पन्नाः।

एवम् अष्टाध्याय्यां तेन प्रोक्तम् इति सूत्रेण पाणिनिना प्रोक्तं पाणिनीयम् इति शब्दः निष्पादितः। भोजदेवः अथर्वणोऽण् वेदे इति सूत्रेण अथर्वणस्तेन प्रोक्तमित्येतस्मिन्नर्थे वेदेऽभिधेयेऽण् प्रत्ययो भवतीति प्रतिपादयति। आथर्वणो वेद इत्युदाहरणमपि भोजेन दत्तं वर्तते। सरस्वतीकण्ठाभरणस्य अग्रिमं सूत्रं भवति लुक् च वा इति। अथर्वणशब्दात् तेन प्रोक्तमित्यर्थे वेदेऽभिधेयेऽण्प्रत्ययस्य लुक् च वा भवति इति अस्य सूत्रार्थः। ततः वसिष्ठादिभ्योऽनुवाकादिषु इति सूत्रेण वसिष्ठादिभ्यस्तेन प्रोक्तमित्यस्मिन्नर्थे अनुवाकादिष्वभिधेयेषूत्पन्नस्याणादेर्लुग्(वा)भवतीत्युच्यते। विकल्पेन आथर्वणः इत्यत्र अणः लोपे अथर्वा इति वासिष्ठः इत्यत्र अणः लोपे वसिष्ठः, वैश्वामित्रः इत्यत्र अणः लोपे विश्वामित्रः इत्यपि सिध्यति।

प्रक्रियासर्वस्वे तेन प्रोक्तम् इति सूत्रस्य व्याख्यानावसरे नारायणभट्टेन सरस्वतीकण्ठाभरणस्थानां त्रयाणां सूत्राणामुल्लेखनं कृतम्। तत्रोच्यते नारायणभट्टेन अस्मिन्नर्थेऽणादिः इति। पाणिनीयं शास्त्रं, शौनकीया शिक्षा इत्युदाहरणे दत्ते भट्टतिरिः

प्रकर्षेणोक्तमेवात्र प्रोक्तं न कृतमेव तत्।
शास्त्रं च सविशेषोक्तं पाणिन्याद्यैर्न तत् कृतम्।।

इति कारिकां प्रतिपादयति। ततः उच्यते भोज आह - अथर्वणोऽण् वेदे । अथर्वणा प्रोक्तो आथर्वणः। लुक् च वा अथर्वा वेदः। वसिष्ठादिभ्योऽनुवाकादिषु एभ्योऽनुवाकादिषु वाच्येषु प्रोक्तप्रत्ययस्य वा लुक्। वसिष्ठेन प्रोक्तोऽनुवाकोऽध्यायो वा वसिष्ठः, वासिष्ठः। विश्वामित्रः, वैश्वामित्रः इति भोजोक्तानि उदाहरणानि तत्र प्रतिपादितानि।

एवं प्रकारेण नारायणभट्टेन न केवलं तद्धितप्रकरणे सम्पूर्णे प्रक्रियासर्वस्वे शताधिकेषु स्थानेषु भोजमतानि उल्लिखितानि।प्रक्रियासर्वस्वस्य समग्रावलोकनेन नारायणभट्टः न केवलं पाणिनीयव्याकरणे अपि तु भोजव्याकरणे निपुणः आसीदिति ज्ञायते। विंशति खण्डेषु विभक्तेषु प्रक्रियासर्वस्वे तद्धितखण्डे नारायणभट्टेन भोजव्याकरणावरुद्धेन बहूनि कार्याणि प्रतिपादितानि। तेषु कानिचनोदाहरणानि अत्र चर्चितानि। नारायणभट्टस्य तद्धितखण्डः पाणिनीयसूत्रक्रमानुसारः भवति। किन्तु भोजदेवेन पाणिनीयप्रयुक्तसूत्रेषु बहुत्र परिवर्तनं कृतम्। नारायणभट्टेन पाणिनीयसूत्रेषु परिवर्तनं न कृतं चेदपि व्याख्यानसन्दर्भे पाणिनिना अनुक्तानां भोजसूत्राणामुल्लेखनं कृतमिति एतैः उदाहरणैः ज्ञातुं शक्यते।

सहायकग्रन्थाः।

१. प्रक्रियासर्वस्वम्, नारायणभट्टः, सं. के.पी. नारायणपिषारोटि, गुरुवायूर् देवस्वम्, गुरुवायूर्, १९९८.

२. सरस्वतीकण्ठाभरणम्, (नारायणदण्डनाथकृता हृदयहारिणीव्याख्या), भोजदेवः, सं. साम्बशिवशास्त्री, राजकीयमुद्रणालयम्, तिरुवनन्तपुरम्, १९३८.

३. सरस्वतीकण्ठाभरणम्, भोजदेवः, सं. टि. आर्. चिन्तामणिः, मद्रपुरीयविश्वविद्यालयः, १९३७

४. वैयाकरणसिद्धान्तकौमुदी, भट्टोजिदीक्षितः, सं. गोपालदत्तपाण्डेयः, चौखम्बा विद्याभवन्, वाराणसी, २००४

५. वैयाकरणसिद्धान्तकौमुदी,(वासुदेवदीक्षितकृता बालमनोरमाव्याख्या), भट्टोजिदीक्षितः, सं. गोपालदत्तपाण्डेयः, चौखम्बा विद्याभवन्, वाराणसी, २००७

६. सरस्वतीकण्ठाभरण और सिद्धान्तकौमुदी का साङ्गोपाङ्ग विवेचन, डॉ.रामचन्द्र, परिमल पब्लिकेशन्स, दिल्ली, २०१०

७. सरस्वतीकण्ठाभरण के भ्रष्टपाठः सत्पाठनिर्धारण, परिमल पब्लिकेशन्स, दिल्ली, २०११